# संस्कृतवार्ता:

दिनाङ्क : 02/08/2025 सायम् - 06:20

आदौ-मुख्यवार्ता:

- प्रधानमन्त्रिणा देशस्य सप्तति-लक्षाधिक-नव-कोटिकाधिकेभ्य: कृषकेभ्य: कृषक-सम्मान-निधे: विंशं धनपुटकं प्रख्यापितम्।
- श्रीमोदिना निज-वक्तव्ये प्रोक्तं यत् बाबा-विश्वनाथस्य कृपया, भारतेन पहलगाम आक्रमणे पीडितेभ्य: कृतं न्यायप्रदानम्।
- दिल्ल्या: न्यायालयेन रॉबर्ट वाड्रा समेतेभ्य: दश-अन्येभ्य: अवैध-धनाहरण-प्रकरणे अधिसूचना प्रख्यापिता, आगामिवादश्रवणं च भविष्यति अगस्त-अष्टा-विंश्याम्।
- भारतेन भारत-संयुक्त-राष्ट्रसङ्घस्य वैश्विक-क्षमता-निर्माण-परिकल्पना-प्रकल्पस्य अन्तर्गतं वैश्विक-दक्षिण-देशानां सतत-विकास-लक्ष्याणां पूर्तये चतुर्णां विकास-परियोजनानां प्रथम: समूहः प्रारब्धः।

---------------------------------------------------

प्रधानमन्त्री- कृषकसम्माननिधि:

प्रधानमन्त्री श्रीनरेन्द्रमोदी अद्य वाराणसी-त: समस्तस्यापि देशस्य सप्तति-लक्षाधिक-नव-कोटिकाधिकेभ्य: कृषकेभ्य: कृषक-सम्मान-निधे: विंशं धनपुटकं प्रख्यापितवान्, एवं प्रकारेण कृषकाणां बैंक-लेखासु साक्षात् पञ्च-शताधिक-विंशति-सहस्र-कोटिकानि रूप्यकाणि जातानि हस्तान्तरितानि। साकमेव प्रधानमन्त्री द्वि-शतोत्तर-द्वि-सहस्र-कोटि-मितानां रूप्यकाणां द्वि-पञ्चाशन्मिता: विकास परियोजनाश्चापि शिलान्यास- पुरस्सरम्

उद्घाटितवान्। सभां संबोधयन्, प्रधानमन्त्री काश्या साकं निज-सम्बन्धस्य विषयेऽपि प्रकाशम् अक्षिपत्। प्रोक्तवान् च यत् ऑपरेशन सिंदूर इत्याख्यस्य सैन्याभियानस्य सफलताया: अनन्तरं, स प्रथमवारं काशीमागतोऽस्ति। बाबा-विश्वनाथस्य कृपया, भारतेन पहलगाम आक्रमणे पीड़ितेभ्य: जनेभ्य: न्यायप्रदानं कृतम्। विपक्षस्य आलोचनां कुर्वन् प्रधानमन्त्री मोदी अवदत् यत् एतत् नवीनं भारतमस्ति। ऑपरेशन सिंदूर इति सैन्याभियानस्य अवसरे समग्रेणापि विश्वेन आत्मनिर्भर-भारतस्य सामर्थ्यम् अवलोकितम्। श्रूयंताम् तावत्....

कृषकाणां विषये सम्भाषमाण: प्रधानमन्त्री मोदी प्रावोचत् यत् "प्रधानमन्त्री कृषक-सम्मान-निधि:" कृषकाणां कल्याणम्प्रति सर्वकारस्य प्रतिबद्धताया: एकम् उदाहरणमस्ति।

श्रीमोदी प्रत्यपादयत् यत् सर्वकारेण कृषकेभ्य: एका नवीना योजना, "प्रधानमन्त्री धन-धान्य-योजना" अपि प्रारब्धा अस्ति। अमुना भणितं यत् ऋतु: सर्वदैव कृषकाणां कृते समाह्वानत्वेन तिष्ठति, अत एव "प्रधानमन्त्री फसल बीमा" इति योजनाया: अन्तर्गतम् अधुना पर्यन्तं कृषकेभ्य: पञ्च-सप्तति-लक्षा-धिक-एक-कोटि-मिताना रूप्यकाणां क्लेम इति देयधनं प्रदत्तम् अस्ति। अमुना सर्वेऽपि जना: "वोकल फॉर लोकल" इति "स्थानीयतायै मुखरता" प्रकल्पं प्राथमिकतया प्रवर्तयितुं अथ च पर्वणां समये स्थानीय-उत्पादानां क्रयणे एव प्राथमिकतां दातुमपि अभ्यर्थिता:।

---

**प्रधानमन्त्री कुमारस्वामी:**

प्रधानमन्त्री नरेन्द्र मोदी अद्य एकं लेखं विनिमयीकृतवान् यत् कथं भारतं वैद्युतिक-गतिशीलतायां, हरित-प्रौद्योगिक्याम् आत्मनिर्भर-विनिर्माणेषु च विशेषं बलं प्रदाय नैजम् औद्योगिकं परिदृश्यं नूतनाकारत्वेन परिवर्तयति। केन्द्रीय-मन्त्रिण: एच.डी. कुमारस्वामिन: एकस्य पोस्ट इति सञ्जालीय-लेखस्य प्रत्युत्तरे, प्रधानमन्त्री एतस्मिन् विषये बलं प्रदत्तवान् यत् लक्षित-योजना: सार्वजनिक-निजी-सहभागिता च देशस्य औद्योगिक-परिदृश्यानि नूतनाकारेण परिवर्तयन्ति।

---------------------------------------------------

## दिल्लीन्यायालय: - वाड्रा

दिल्ल्या: एकेन न्यायालयेन कांग्रेस-सांसदाया: प्रियङ्कागान्धि-वाड्राया: पतये रॉबर्ट वाड्रा इत्यस्मै अधिसूचना प्रख्यापिता। शिकोहपुर-भूमि-क्रयण-प्रसङ्गे राऊज एवेन्यू न्यायालयेन प्रवर्तन-निदेशालय-द्वारा हाई-प्रोफाइल मनी लॉन्ड्रिंग इति उच्च-स्तरीय-अवैध-धनाहरण-प्रकरणे पञ्जीकृतस्य आरोपपत्रस्य संज्ञानम् अभिस्वीकृतम्। ततश्च आहत्य वाड्रा-सहितेभ्य: एकादश-जनेभ्यः अधिसूचना: प्रख्यापिता:। प्रकरणेऽस्मिन् आगामि-वाद-श्रवणम् अगस्त-अष्टाविंश्यां भविष्यति। ईडीति प्रवर्तन-निदेशालयेन कथित-प्रवञ्चना-माध्यमेन गुरुग्रामस्य शिकोहपुर-ग्रामे दशमलवोत्तर-पञ्च, त्रि, अधिक त्रि-प्रहल-मिताया: भूमे: क्रयणेन सम्बद्धे एकस्मिन् प्रकरणे वाड्रा-समेतानाम् अन्य-दश जनानां विरोधे आरोपपत्रं प्रस्तुतम् अस्ति। अन्वीक्षणाभिकरणस्य दृढं मन्तव्यम् अस्ति यत् अपराधस्य आय: वाड्रा-द्वारा नियन्त्रितानां भूरि-समवायानां माध्यमेन जातः आसीत्। अन्वीक्षणस्य अङ्गत्वेन ईडीति प्रवर्तन-निदेशालयेन पूर्वमेव वाड्रा इत्यस्य स्काई लाइट हॉस्पिटैलिटी प्राइवेट

लिमिटेड इति समवायेन सम्बद्धानां त्रि-चत्वारिंशत्-मितानां संपत्तीनां जडीकरणं कृतम् अस्ति, येषाम् आहत्य मूल्यं प्राय: अष्ट-त्रिंशत्-कोटि रूप्यकाणि सन्ति।

---------------------------------------------------

## निर्वाचनायोग:

निर्वाचनायोगेन बूथ-स्तरीय-पदाधिकारिणां (बीएलओ) इत्येतेषां पारिश्रमिकं द्विगुणीकृतम्। अपि च निर्वाचन-सूचीनां निर्माणे पुनरीक्षणे च संलग्नानां बी.एल.ओ. इति कुटीर-स्तरीय-पर्यवेक्षकानां पारिश्रमिकमपि वर्धितम्। निर्वाचनायोगेन एकस्मिन् वक्तव्ये सूचितं यत् संशोधित-संरचनानुसारं बी.एल.ओ. कर्मिणां वार्षिकं पारिश्रमिकं षट्सहस्र-रूप्यकाणि यावत् द्विगुणीकृतम् अस्ति।

---------------------------------------------------

## जम्मू-कश्मीर-संघर्ष:

जम्मू-कश्मीरे कुलगाम-मण्डलस्य अखल-देवसर-क्षेत्रे सुरक्षाबलैः सह जाते संघर्षे द्वौ आतङ्कवादिनौ सैन्यभटै: पञ्चतां प्रापितौ। आरक्षि-स्रोतसामनुसारेण सैन्यबलं, जम्मू-कश्मीरारक्षि-बलं, सी.आर.पी.एफ. बलं च क्षेत्रे आतङ्कवादिनः निगूहनस्य विषये विशिष्टसूचनायाः आधारेण संयुक्ताभियानं प्रारब्धवन्त: आसन् तदानीमेव एष: संघर्ष: दुरापन्न: ।

---------------------------------------------------

## भारत संयुक्तराष्ट्रसङ्घस्य परियोजनाः

भारतेन "भारत-संयुक्तराष्ट्रसङ्घस्य वैश्विक-क्षमता-निर्माण-परिकल्पना" इत्यस्य प्रकल्पस्य अन्तर्गतं चतुर्णां विकासपरियोजनानां प्रथमसमूहः प्रारब्धः, यस्य उद्देश्य: वैश्विक-दक्षिण-देशानां सतत-विकास-लक्ष्याणां पूर्तये समर्थनं वर्तते। अस्मिन् सन्दर्भे ह्यः विदेश-

मन्त्रालयस्य सचिवेन तन्मय-लालेन परियोजना: आधिकारिकतया प्रारब्धाः सन्ति। विदेश-मन्त्रालयानुसारेण भारत-संयुक्तराष्ट्रसङ्घयोः **वैश्विक-दक्षिण-क्षमता-निर्माण-परिकल्पना-प्रकल्प:** भारतस्य विकास-सहभागि-प्रयासानां स्वाभाविक: विस्तारः अस्ति । भारतं प्रथमचरणस्य कार्यक्रमे विश्व-खाद्य-कार्यक्रमस्य साहाय्येन नेपाले तण्डुलानां संवर्धने आपूर्ति-शृङ्खला-प्रबन्धने च साहाय्यं करिष्यति, सहैव यू.एन.डी.पी.-समर्थनेन जाम्बिया देशस्य, लाओ-पीडीआर-देशस्य च डिजिटल-स्वास्थ्य-मञ्चानां विकासं चापि करिष्यति। ततश्च संयुक्त-राष्ट्र-सङ्घस्य जनसंख्या-कोषस्य सहयोगेन बेलीज, बार्बाडोस्, सेण्ट् किट्स् एण्ड् नेविस्, सूरीनाम, त्रिनिदाद एण्ड् टोबैगो चेत्येतेषु देशेषु जनगणना-सज्जतायां तत्रत्यान् अधिकारिणः प्रशिक्षयिष्यति, यूनेस्को-समर्थनेन दक्षिण-सूडान-देशे व्यावसायिक-प्रशिक्षणं च प्रदास्यति। एतद् विषये प्रचित-प्रशिक्षण-प्रकल्पा: ऐषमो वर्षस्य सितम्बर-मासे आरप्स्यन्ते, ये आई.टी.ई.सी. रूपरेखायाः अन्तर्गतं निर्दिष्टानां भारतीय-प्रशिक्षण-संस्थानानां माध्यमेन कारयिष्यन्ते।

---

## यू.पी.आई. धन-विनिमयस्य कीर्तिमत्ता

भारतस्य डिजिटल इति अङ्कीय-धन-विनिमयस्य प्रयोग: वर्धतेतराम्। ऐषमो जुलाई-मासे सप्त-चत्वारिंशदुत्तर-नव-शताधिक-एक-सहस्र-मितानां जनानाम् अङ्कीय-धन-विनिमयस्य एका नवीना कीर्तिमत्ता भारतेन समर्जितास्ति, यत्र हि आहत्य दशमलवोत्तर-एकाधिक-पञ्च-विंशति-लक्ष-कोटि-रूप्याकाणां विनिमयो जातः आसीत् । एषा अङ्कत्रा-विनिमयस्य मात्रायां प्रतिवर्षं प्रतिशतं पञ्चत्रिंशन्मितायाः प्रकृष्टा वृद्धि: वर्तते। अथ च मूल्येषु अपि प्रतिशतं द्वा-विंशति-मिता वृद्धि: जायते, यद्धि डिजिटल इति अङ्कीय-धन-विनिमय-पारिस्थितिकी-तन्त्रे UPI इत्यस्य निरन्तरं प्रभुत्वं रेखांकयति।

--------------------------------------------------

**टेबल टेनिस**

ऐषमो डब्ल्यू.टी.टी. - टेबल-टेनिस-क्रीडा-तारका ब्राजील: क्रीडा-स्पर्धायां भारतेन अधिगतं प्रथमं स्थानम्। ब्राजीलस्य "फाइस्- दु-ईगु-आकू" इत्यत्र अद्य इतिहासो रचित:, यत्र भारतीयं युगल-दल-द्वयं अन्त्यचक्रे प्रविष्टम्, यद्धि अस्यां क्रीडा-शृङ्खलायां देशस्य कृते प्रथमवारमस्ति। मिश्रित-युगले, शीर्ष-वरीयतारूढौ मानुष-शाह: दिया-चिताले च उपान्त्यचक्रे चिली-देशस्य निकोलस-बर्गोसं, पॉलिना वेगां च शून्यं विरुध्य त्रिभिः अङ्कै: पराभूय विजयमधिगतवन्तौ। एवं विजयं प्राप्य तौ अन्त्यचक्रे प्रविष्टवन्तौ। अन्त्यचक्रे एतयोः साम्मुख्यं जापानस्य सतोशी आइदा, होनोका हाशिमोतो इत्यनयोः युगलेन साकं भविष्यति। अपरत्र च पुरुष-युगल-स्पर्धायां भारतस्य शीर्ष-वरीयता-प्राप्तस्य मानव-ठक्करस्य मानुष-शाहस्य चापि युगलम् अन्त्यचक्रे प्राप्तम् । एताभ्यां चीनी-ताइपे देशस्य **हुआंग यान-चेंगस्य, कुओ गुआन-होंगस्य च युगलं** एकस्मिन् रोमांचके उपान्त्यचक्रे पञ्च-एकादश, एकादश-नव, एकादश-षट्, अष्ट-एकादश, एकादश-पञ्च चेति अङ्कै: पराभूतम्।

।। इति वार्ता ।।